# Pashupatasutram

# પાશુપતસૂત્રમ્

## Document Information

Text title : Pashupata Sutram

File name : pAshupatasUtram.itx

Category : shiva, sUtra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : Shaiva Agama Tantra, Pashupata Shaiva Yoga

Latest update : September 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# પાશુપતસૂત્રમ્

॥ ૐ શ્રીસચ્ચિદાનન્દાય નમઃ ॥

અથ શ્રીલકુલીશકૃતં પાશુપતસૂત્રમ્ ।

## પ્રથમોऽધ્યાયઃ ।

॥ પદાર્થોપન્યાસઃ ॥

અથાતઃ પશુપતેઃ પાશુપતં યોગવિધિં વ્યાખ્યાસ્યામઃ ॥ ૧.૧ ॥

॥ ભસ્મપ્રકરણમ્ એવં યમપ્રકરણમ્ ॥

ભસ્મના ત્રિષવણં સ્નાયીત ॥ ૧.૨ ॥

ભસ્મનિ શયીત ॥ ૧.૩ ॥

અનુસ્નાનમ્ ॥ ૧.૪ ॥

નિર્માલ્યમ્ ॥ ૧.૫ ॥

લિઙ્ગધારી ॥ ૧.૬ ॥

આયતનવાસી ॥ ૧.૭ ॥

હસિતગીતનૃત્તડુણ્ડુઙ્કારનમસ્કારજપ્યોપહારેણોપતિષ્ઠેત્ ॥ ૧.૮ ॥

મહાદેવસ્ય દક્ષિણામૂર્તેઃ ॥ ૧.૯ ॥

॥ આયતનપ્રકરણમ્ ॥

એકવાસાઃ ॥ ૧.૧૦ ॥

અવાસા વા ॥ ૧.૧૧ ॥

મૂત્રપુરીષં નાવેક્ષેત્ ॥ ૧.૧૨ ॥

સ્ત્રીશૂદ્રં નાભિભાષેત્ ॥ ૧.૧૩ ॥

યદ્યવેક્ષેદ્યદ્યભિભાષેત્ ॥ ૧.૧૪ ॥

ઉપસ્પૃશ્ય ॥ ૧.૧૫ ॥

પ્રાણાયામં કૃત્વા ॥ ૧.૧૬ ॥

રૌદ્રીં ગાયત્રીં બહુરૂપીં વા જપેત્ ॥ ૧.૧૭ ॥

અકલુષમતેઃ ॥ ૧.૧૮ ॥

ચરતઃ ॥ ૧.૧૯ ॥

તતોઽસ્ય યોગઃ પ્રવર્તતે ॥ ૧.૨૦ ॥

॥ આધિકારિકમ્ ઐશ્વર્યપ્રકરણમ્ ॥

દર્શનશ્રવણમનનવિજ્ઞાનાનિ ચાસ્ય પ્રવર્તન્તે ॥ ૧.૨૧ ॥

સર્વજ્ઞાતા ॥ ૧.૨૨ ॥

મનોજવિત્વમ્ ॥ ૧.૨૩ ॥

કામરૂપિત્વમ્ ॥ ૧.૨૪ ॥

વિકરણઃ ॥ ૧.૨૫ ॥

ધર્મિત્વં ચ ॥ ૧.૨૬ ॥

॥ ષટ્સૂત્રીપ્રકરણમ્ ॥

સર્વે ચાસ્ય વશ્યા ભવન્તિ ॥ ૧.૨૭ ॥

સર્વેષાં ચાવશ્યો ભવતિ ॥ ૧.૨૮ ॥

સર્વાંશ્ચાવિશતિ ॥ ૧.૨૯ ॥

સર્વેષાં ચાનાવેશ્યો ભવતિ ॥ ૧.૩૦ ॥

સર્વે ચાસ્ય વધ્યા ભવન્તિ ॥ ૧.૩૧ ॥

સર્વેષાં ચાવધ્યો ભવતિ ॥ ૧.૩૨ ॥

॥ ઐશ્વર્યનિત્યત્વપ્રકરણમ્ ॥

અભીતઃ ॥ ૧.૩૩ ॥

અક્ષયઃ ॥ ૧.૩૪ ॥

અજરઃ ॥ ૧.૩૫ ॥

અમરઃ ॥ ૧.૩૬ ॥

સર્વત્ર ચાપ્રતિહતગતિર્ભવતિ ॥ ૧.૩૭ ॥

ઇત્યેતૈર્ગુણૈર્યુક્તો ભગવતો મહાદેવસ્ય મહાગણપતિર્ભવતિ ॥ ૧.૩૮ ॥

॥ સદ્યોઽજાતમન્ત્રપ્રકરણમ્ ॥

અત્રેદં બ્રહ્મ જપેત્ ॥ ૧.૩૯ ॥

સદ્યોઽજાતં પ્રપદ્યામિ ॥ ૧.૪૦ ॥

સદ્યોઽજાતાય વૈ નમઃ ॥ ૧.૪૧ ॥

ભવે ભવે નાતિભવે ॥ ૧.૪૨ ॥

ભજસ્વ મામ્ ॥ ૧.૪૩ ॥

ભવોદ્ભવઃ ॥ ૧.૪૪ ॥

## દ્વિતીયોઽધ્યાયઃ ।

॥ આધિકારિકં કાર્યકારણપ્રકરણમ્ ॥

વામઃ ॥ ૨.૧ ॥

દેવસ્ય ॥ ૨.૨ ॥

જ્યેષ્ઠસ્ય ॥ ૨.૩ ॥

રુદ્રસ્ય ॥ ૨.૪ ॥

કલિતાસનમ્ ॥ ૨.૫ ॥

સાર્વકામિક ઇત્યાચક્ષતે ॥ ૨.૬ ॥

॥ આનુષઙ્ગકં કાર્યકારણપ્રકરણમ્ ॥

અમઙ્ગલં ચાત્ર મઙ્ગલં ભવતિ ॥ ૨.૭ ॥

અપસવ્યં ચ પ્રદક્ષિણમ્ ॥ ૨.૮ ॥

તસ્માદુભયથા યષ્ટવ્યઃ ॥ ૨.૯ ॥

દેવવત્પિતૃવચ્ચ ॥ ૨.૧૦ ॥

ઉભયં તુ રુદ્રે દેવાઃ પિતરશ્ચ ॥ ૨.૧૧ ॥

॥ ચર્યાપ્રકરણમ્ ॥

હર્ષાપ્રમાદી ॥ ૨.૧૨ ॥

ચર્યાયાં ચર્યાયામ્ ॥ ૨.૧૩ ॥

માહાત્મ્યમવાપ્નોતિ ॥ ૨.૧૪ ॥

અતિદત્તમતીષ્ટમ્ ॥ ૨.૧૫ ॥

અતિતપ્તં તપસ્તથા ॥ ૨.૧૬ ॥

અત્યાગતિં ગમયતે ॥ ૨.૧૭ ॥

તસ્માત્ ॥ ૨.૧૮ ॥

ભૂયસ્તપશ્ચરેત્ ॥ ૨.૧૯ ॥

નાન્યભક્તિસ્તુ શઙ્કરે ॥ ૨.૨૦ ॥

॥ વામદેવમન્ત્રપ્રકરણમ્ ॥

અત્રેદં બ્રહ્મ જપેત્ ॥ ૨.૨૧ ॥

વામદેવાય નમો જ્યેષ્ઠાય નમો રુદ્રાય નમઃ ॥ ૨.૨૨ ॥

કાલાય નમઃ ॥ ૨.૨૩ ॥

કલવિકરણાય નમઃ ॥ ૨.૨૪ ॥

બલપ્રમથનાય નમઃ ॥ ૨.૨૫ ॥

સર્વભૂતદમનાય નમઃ ॥ ૨.૨૬ ॥

મનોઽમનાય નમઃ ॥ ૨.૨૭ ॥

# તૃતીયોઽધ્યાયઃ ।

॥ વિધિપ્રકરણમ્ ॥

અવ્યક્તલિઙ્ગી ॥ ૩.૧ ॥

વ્યક્તાચારઃ ॥ ૩.૨ ॥

અવમતઃ ॥ ૩.૩ ॥

સર્વભૂતેષુ ॥ ૩.૪ ॥

પરિભૂયમાનશ્ચરેત્ ॥ ૩.૫ ॥

અપહતપાપ્મા ॥ ૩.૬ ॥

પરેષાં પરિવાદાત્ ॥ ૩.૭ ॥

પાપં ચ તેભ્યો દદાતિ ॥ ૩.૮ ॥

સુકૃતં ચ તેષામાદત્તે ॥ ૩.૯ ॥

તસ્માત્ ॥ ૩.૧૦ ॥

પ્રેતવચ્ચરેત્ ॥ ૩.૧૧ ॥

ક્રાથેત વા ॥ ૩.૧૨ ॥

સ્પન્દેત વા ॥ ૩.૧૩ ॥

મણ્ટેત વા ॥ ૩.૧૪ ॥ (મન્દેત વા)
શ‍ૃઙ્ગારેત વા ॥ ૩.૧૫ ॥

અપિતત્કુર્યાત્ ॥ ૩.૧૬ ॥

અપિતદ્ભાષેત્ ॥ ૩.૧૭ ॥

યેન પરિભવં ગચ્છેત્ ॥ ૩.૧૮ ॥

પરિભૂયમાનો હિ વિદ્વાન્કૃત્સ્નતપા ભવતિ ॥ ૩.૧૯ ॥

॥ અઘોરમન્ત્રપ્રકરણમ્ ॥

અત્રેદં બ્રહ્મ જપેત્ ॥ ૩.૨૦ ॥

અઘોરેભ્યઃ ॥ ૩.૨૧ ॥

અથ ઘોરેભ્યઃ ॥ ૩.૨૨ ॥

ઘોરઘોરતરેભ્યશ્ચ ॥ ૩.૨૩ ॥

સર્વેભ્યઃ ॥ ૩.૨૪ ॥

શર્વસર્વેભ્યઃ ॥ ૩.૨૫ ॥

નમસ્તે અસ્તુ રુદ્રરૂપેભ્યઃ ॥ ૩.૨૬ ॥

## ચતુર્થોઽધ્યાયઃ ।

॥ વિદ્યાજ્ઞાનપ્રકરણમ્ ॥

ગૂઢવિદ્યા તપ આનન્ત્યાય પ્રકાશતે ॥ ૪.૧ ॥

ગૂઢવ્રતઃ ॥ ૪.૨ ॥

ગૂઢપવિત્રવાણિઃ ॥ ૪.૩ ॥

સર્વાણિ દ્વારાણિ પિધાય ॥ ૪.૪ ॥

બુદ્ધ્યા ॥ ૪.૫ ॥

॥ આધિકારિકમ્ અસન્માનચરિપ્રકરણમ્ ॥

ઉન્મત્તવદેકો વિચરેત લોકે ॥ ૪.૬ ॥

કૃતાન્નમુત્સૃષ્ટમુપાદદીત ॥ ૪.૭ ॥

ઉન્મત્તો મૂઢ ઇત્યેવં મન્યન્તે ઇતરે જનાઃ ॥ ૪.૮ ॥

॥ આનુષઙ્ગિકં અસન્માનચરિપ્રકરણમ્ ॥

અસન્માનો હિ યન્ત્રાણાં સર્વેષામુત્તમઃ સ્મૃતઃ ॥ ૪.૯ ॥

ઇન્દ્રો વા અગ્રે અસુરેષુ પાશુપતમચરત્ ॥ ૪.૧૦ ॥

સ તેષામિષ્ટાપૂર્તમાદત્ત ॥ ૪.૧૧ ॥

માયયા સુકૃતયા સમવિન્દત ॥ ૪.૧૨ ॥

નિન્દા હ્યેષાનિન્દા તસ્માત્ ॥ ૪.૧૩ ॥

નિન્દ્યમાનશ્ચરેત્ ॥ ૪.૧૪ ॥

અનિન્દિતકર્મા ॥ ૪.૧૫ ॥

સર્વવિશિષ્ટોઽયં પન્થાઃ ॥ ૪.૧૬ ॥

સત્પથઃ ॥ ૪.૧૭ ॥

કુપથાસ્ત્વન્યે ॥ ૪.૧૮ ॥

અનેન વિધિના રુદ્રસમીપં ગત્વા ॥ ૪.૧૯ ॥

ન કશ્ચિદ્બ્રાહ્મણઃ પુનરાવર્તતે ॥ ૪.૨૦ ॥

॥ તત્પુરુષમન્ત્રપ્રકરણમ્ ॥

અત્રેદં બ્રહ્મ જપેત્ ॥ ૪.૨૧ ॥

તત્પુરુષાય વિદ્મહે ॥ ૪.૨૨ ॥

મહાદેવાય ધીમહિ ॥ ૪.૨૩ ॥

તન્નો રુદ્રઃ પ્રચોદયાથત્ ॥ ૪.૨૪ ॥

## પઞ્ચમોઽધ્યાયઃ ।

॥ યોગિલક્ષણમ્ ॥

અસઙ્ગઃ ॥ ૫.૧ ॥

યોગી ॥ ૫.૨ ॥

નિત્યાત્મા ॥ ૫.૩ ॥

અજઃ ॥ ૫.૪ ॥

મૈત્રઃ ॥ ૫.૫ ॥

અભિજાયતે ॥ ૫.૬ ॥

ઇન્દ્રિયાણામભિજયાત્ ॥ ૫.૭ ॥

રુદ્રઃ પ્રોવાચ તાવત્ ॥ ૫.૮ ॥

॥ શૂન્યાગારગુહાપ્રકરણમ્ ॥

શૂન્યાગારગુહાવાસી ॥ ૫.૯ ॥

દેવનિત્યઃ ॥ ૫.૧૦ ॥

જિતેન્દ્રિયઃ ॥ ૫.૧૧ ॥

ષણ્માસાન્નિત્યયુક્તસ્ય ॥ ૫.૧૨ ॥

ભૂયિષ્ઠં સમ્પ્રવર્તતે ॥ ૫.૧૩ ॥

ભૈક્ષ્યમ્ ॥ ૫.૧૪ ॥

પાત્રાગતમ્ ॥ ૫.૧૫ ॥

॥ યોગપદાર્થપ્રકરણમ્ ॥ (યોગવિષયક વસ્તુ પ્રકરણમ્)

માંસમદુષ્યં લવણેન વા ॥ ૫.૧૬ ॥

આપો વાપિ યથાકાલમશ્નીયાદનુપૂર્વશઃ ॥ ૫.૧૭ ॥

ગોધર્મા મૃગધર્મા વા ॥ ૫.૧૮ ॥

અદ્ભિરેવ શુચિર્ભવેત્ ॥ ૫.૧૯ ॥

સિદ્ધયોગી ન લિપ્યતે કર્મણા પાતકેન વા ॥ ૫.૨૦ ॥

ઋચમિષ્ટામધીયીત ગાયત્રીમાત્મયન્ત્રિતઃ ॥ ૫.૨૧ ॥

રૌદ્રીં વા બહુરૂપીં વા ॥ ૫.૨૨ ॥

અતો યોગઃ પ્રવર્તતે ॥ ૫.૨૩ ॥

ઓઙ્કારમભિધ્યાયીત ॥ ૫.૨૪ ॥

હૃદિ કુર્વીત ધારણામ્ ॥ ૫.૨૫ ॥

ઋષિર્વિપ્રો મહાનેષઃ ॥ ૫.૨૬ ॥

વાગ્વિશુદ્ધઃ ॥ ૫.૨૭ ॥

મહેશ્વરઃ ॥ ૫.૨૮ ॥

॥ દુઃખાન્તપ્રકરણમ્ ॥

(.....) ॥ ૫.૨૯ ॥

શ્મશાનવાસી ॥ ૫.૩૦ ॥

ધર્માત્મા ॥ ૫.૩૧ ॥

યથાલબ્ધોપજીવકઃ ॥ ૫.૩૨ ॥

લભતે રુદ્રસાયુજ્યમ્ ॥ ૫.૩૩ ॥

સદા રુદ્રમનુસ્મરેત્ ॥ ૫.૩૪ ॥

છિત્ત્વા દોષાણાં હેતુજાલસ્ય મૂલમ્ ॥ ૫.૩૫ ॥

બુદ્ધ્યા ॥ ૫.૩૬ ॥

સઞ્ચિત્તમ્ ॥ ૫.૩૭ ॥

સ્થાપયિત્વા ચ રુદ્રે ॥ ૫.૩૮ ॥

એકઃ ક્ષેમી સન્વીતશોકઃ ॥ ૫.૩૯ ॥

અપ્રમાદી ગચ્છેદ્દુઃખાનામન્તં ઈશપ્રસાદાત્ ॥ ૫.૪૦ ॥

॥ ઈશાનમન્ત્રપ્રકરણમ્ ॥

અત્રેદં બ્રહ્મ જપેત્ ॥ ૫.૪૧ ॥

ઈશાનઃ સર્વવિદ્યાનામ્ ॥ ૫.૪૨ ॥

ઈશ્વરઃ સર્વભૂતાનામ્ ॥ ૫.૪૩ ॥

બ્રહ્મણોઽધિપતિર્બ્રહ્મા ॥ ૫.૪૪ ॥

શિવો મે અસ્તુ ॥ ૫.૪૫ ॥

સદા ॥ ૫.૪૬ ॥

શિવઃ ॥ ૫.૪૭ ॥

ઇતિ શ્રીલકુલીશકૃતં પાશુપતસૂત્રમ્ ।

॥ શુભમ્ ॥

The prakaraNam-s pertain to the Kaundinya Bhashya, and their placement occurs with some differences amongst the various publications. These have been marked here for ease of reference.

Sutra 5.29 is reported as missing in some

publications, which therefore have the last Sutra numbered as 5.47; while other publications have concluding Sutra numbered as 5.46.

Encoded and proofread by Ruma Dewan

*Pashupatasutram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*